'उष्ट्रान् हयान् खरान् नागान् शम्बूर्दंष्ट्रकषाङ्कुशैः'॥)

कषाकुः, पुं, (कष + आकुः ।) सूर्य्यः । अग्निः । इत्युणादिकोषः ॥

कषायः, पुं क्ली, (कषति कण्ठम् । कष् + आयः ।) रसविशेषः । कषा इति भाषा । पृथिव्यनिलगुणबाहुल्यात्तस्योत्पत्तिः । इति शिवदासः ॥ (यथा, मनुः ११ । १५३ ।

"शुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः" ॥)

तत्पर्य्यायः । तुवरः २ तद्युक्ते त्रि । इत्यमरः । १ । ५ । ९ ॥ कुवरः ३ तूरवः ४ । इति तट्टीका ॥ अस्य गुणाः । व्रणादिरोपणत्वम् । ग्राहित्वम् । शोषणत्वम् । वायुकोपकारित्वञ्च । अतियुक्तस्य तस्य गुणः । मलमूत्रग्रहाध्मानहृत्पीड़ाक्षेपणादिरोगकारित्वम् । अन्यच्च ।

"कषायः शोषणः स्तम्भी व्रणपाकार्त्तिनाशनः ।
कफशोणितवातघ्नो रूक्षः शीतो गुरुस्तथा" ॥

इति राजवल्लभः ॥ अपि च ।

"कषायनामा निरुणद्धि शोफं
वर्णान्तनोर्दीपनपाचनञ्च ।
सत्त्वापहोऽसौ शिथिलत्वकारी
निषेवितः पाण्डु करोति मानम्" ॥

इति राजनिर्घण्टः ॥ * ॥ पाचनादिः । तस्य पूर्णवीर्य्यं याममेकं तिष्ठति । तत्पर्य्यायः । क्वाथः २ निर्य्यूहः ३ । स तु पञ्चविधो यथा । स्वरसः १ कल्कः २ क्वथितः ३ शीतः ४ फाण्टम् ५ । इति वैद्यकपरिभाषा ॥ * ॥

("जिह्वां कण्ठं ग्रसति नितरां ग्राहकश्चातिसारे
श्लेष्मव्याधेरुपशमकरः श्वासकासापहर्त्ता ।
हिक्कां शूलं हरति नितरां शोधनं स्याद्व्रणानां
प्रोक्तश्चायं समधिकगुणो नाम श्रेष्ठः कषायः" ॥

इति हारीते प्रथम स्थाने ७ अध्याये ॥

"कषायो जड़येज्जिह्वां कण्ठस्रोतो विबन्धकृत्" ॥

"कषायः पित्तकफहा गुरुरस्रविशोधनः ।
पीड़नो रोपणः शीतः क्लेदमेदो विशोषणः ।
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः ॥
करोति शीलितः सोऽति विष्टम्भाध्मानहृद्रुजः ।
तृट्कार्श्यं पौरुषभ्रंशस्रोतोरोधमलग्रहान्" ॥

इति वाभटे सूत्रस्थाने १० अध्याये ॥

"कषायो रसः संशमनः संग्राही सन्धारणः पीड़नो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेदस्योपयोक्ता रूक्षः शीतो गुरुश्च ।

स एवं गुणोऽप्येक एवात्यर्थमुपयुज्यमानः आस्यं शोषयति, हृदयं पीड़यति, उदरमाध्मापयति, वाचां निगृह्णाति, स्रोतांस्यवबध्नाति, श्यावत्वमापादयति, पौंस्त्वमुपहन्ति, विष्टभ्य जरां गच्छति, वातमूत्रपुरीषाण्यवगृह्णाति, कर्षयति, ग्लापयति, तर्षयति, स्तम्भयति, खरविशदरूक्षत्वात् पक्षवध-ग्रहापतानकार्द्दितप्रभृतींश्च वातविकारानुपजनयतीति" ।

"वैषद्यस्तम्भजाड्यैर्यो रसनं योजयेद्रसः ।
बध्नातीव च यः कण्ठं कषायः स विकास्यपि" ॥

"पवन पृथिव्यतिरेकात् कषायः" ॥

इति चरके सूत्रस्थाने २६ अध्याये ॥) निर्य्यासः । (यथा, महाभारते अनुशासनपर्व्वणि ।

"दृष्टो वटकषायेण अनुलिप्तः प्रियङ्गुणा ।
क्षीरेण षष्टिकान् भुक्त्वा सर्व्वपापैः प्रमुच्यते" ॥)

विलेपनम् । (यथा कुमारे ७ । १७ ।

"कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाक्षेपनितान्तगौरे" ॥

"लोध्रस्य वृक्षविशेषस्य कषायेण विलेपनेन" । इति मल्लिनाथः ॥) अङ्गरागः । इति मेदिनी ॥

कषायः, पुं, (कष् + आयः ।) श्योणाकवृक्षः । इति धरणी ॥ रागः । इत्यमरटीकायां स्वामी ॥ (यथा छान्दग्योपनिषदि ।

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलम्भे सर्व्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति" ।

"तस्मै मृदितकषायाय वार्क्षारादिरिव कषायो रागद्वेषादिदोषः सत्त्वस्य रञ्जनरूपत्वात् ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितो मृदितो विनाशितो यस्य नारदस्य तस्मै" । इति भाष्यम् ॥) कलियुगम् । इत्यमरटीकासारसुन्दरी ॥ (निर्व्विकल्पसमाधेर्विघ्नभेदः । यथा, वेदान्तसारे समाधिकल्पे ८१ ।

"लयविक्षेपाभावेऽपि चित्तवृत्तेरागादिवासनया स्तब्धीभावात् अखण्डवस्त्वनवलम्बनम्" । तत्रानेकजन्माभ्यस्तवाह्याभ्यन्तररागाद्यनुभवजनितसंस्कारैः कलुषीकृतं चित्तं कथञ्चित् श्रवणादिसाधनेनान्तर्मुखमपि चैतन्यग्रहणसामर्थ्याभावात् मध्य एव स्तब्धीभवति यथा राजदर्शनाय स्वगृहान्निर्गत्य, राजमन्दिरं प्रविष्टस्य कस्यचित् पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः तथा परित्यक्त वाह्यविषयस्य अखण्डवस्तुग्रहणप्रवृत्तस्योद्बुद्धरागादिसंस्कारैः स्तब्धीभावादखण्डवस्त्वग्रहणं कषायः ॥)

कषायः, त्रि, (कष + आयः ।) सुरभिः । (यथा मेघदूते ३२ ।

"प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः" ॥)

लोहितः । इति मेदिनी ॥ (यथा कुमारे ३ । ३२ ।

"चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज" ॥)

रक्तपीतमिश्रितवर्णः । इत्यमरटीकायां स्वामी ॥ धववृक्षः । इति राजनिर्घण्टः ॥

कषायकृत्, पुं, (कषायं कषायरागं करोति इति । कषाय + कृ + क्विप् तुगागमश्च ॥) रक्तलोध्रः । इति जटाधरः ॥

कषाययावनालः, पुं, (कषायः रक्तवर्णः यावनालः ।) तुवरयावनालधान्यम् । इति राजनिर्घण्टः ॥

कषाया, स्त्री, (कष + आय टाप् च ।) क्षुद्रदुरालभालता । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।

"यासोपवासो दुष्पर्शा धन्वयासः कुनाशकः ।
दुरालभादुरालम्भा समुद्रान्ता च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा" ।)

कषायितः, त्रि, (कषायो रक्तपीतवर्णादिर्जातोऽस्य । कषाय + तारकादित्वात् इतच् ।) कृतलोहितः । (यथा कुमारे ४ । ३४ ।

"अमुनैव कषायितस्तनी
सुभगेन प्रियगात्रभस्मना" ॥)

कषायी, [न्] पुं, (कषायो विद्यते अस्य । कषाय + इनिः ।) शालवृक्षः । इति जटाधरः ॥ लकुचवृक्षः । खर्ज्जूरीवृक्षः । इति राजनिर्घण्टः ॥

कषिः, त्रि, (कषति हिनस्ति यः । कष + "खनि कषि" इत्यादिना इः । उणां ४ । १३९ ।) हिंसकः । इत्युणादिकोषः ॥

कषीका, स्त्री, (कषतीति । कष + "कषि दुषिभ्यां ईकन्" । उणां ४ । १६ । इति ईकन् + टाप् च ।) पक्षिजातिः । यदुक्तं उणादिकोषे ॥

"कषीका पक्षिजातौ स्यात् दूषिका नेत्रयोर्म्मले" ॥

कषेरुका, स्त्री, (कष + एरक् + ततः उः । संज्ञायां कन् टाप् च ।) कशेरुका । पृष्ठास्थि । इत्यमरटीकायां रायमुकुटः ॥

कष्टं, क्ली, (कष्यते इति । कष् + भावे क्तः । "कृच्छ्रगहनयोः कषः" । ७ । २ । २२ । इति नेट् ।) पीड़ामात्रम् । तत्पर्य्यायः । पीड़ा २ बाधा ३ व्यथा ४ दुःखम् ५ अमानस्यम् ६ प्रसूतिजम् ७ कृच्छ्रम् ८ आभीलम् ९ । इत्यमरः । १ । ९ । ३ ॥ आबाधा १० वेदना ११ दुःखम् १२ आमानस्यम् १३ । इति तट्टीकायां भरतः ॥ कलाकलम् १४ । इति वाचस्पतिः ॥ अर्त्तिः १५ आर्त्तिः १६ पीड़नम् १७ बाधनम् १८ आमनस्यम् १९ विबाधनम् २० विहेठनम् २१ विधानकम् २२ पीड़ितम् २३ । इति शब्दरत्नावली ॥ क्वाथः २४ अशर्म्म २५ । इति जटाधरः ॥ (यथा महानिर्व्वाणोक्तात्मज्ञाननिर्णये ।

"कुर्व्वाणः सततं कर्म्म कृत्वा कष्टशतान्यपि ।
तावन्न लभते मोक्षं यावज्ज्ञानं न जायते" ॥)

कष्टः, त्रि, (कष्यतेऽसौ । कष् + कर्म्मणि + क्तः ।) पीड़ायुक्तः । गहनः । इत्यमरमेदिनीकरौ ॥ (यथा मनुः १२ । ७८ ।

"बन्धनानि च कष्टानि परप्रेष्यत्वमेव च" ॥

अतिकष्टकरम् । विषादादौ प्रयोक्तव्यम् । यथा, महाभारते १ । १ । २१५ ।

"कष्टं! युद्धे दशशेषाः श्रुता मे ।
त्रयोऽस्माकं पाण्डवानाञ्च सप्त" ॥)

कष्टकारकः, पुं, (कष्टं करोति उत्पादयति बन्धकत्वात् । कष्ट + कृ + कर्म्मण्यण् । ततः कन् । कष्टं करोतीति । कृ + ण्वुल् वा । कष्टस्य कारको वा ।) संसारः । इति त्रिकाण्डशेषः ॥ पीड़ाकरे त्रि ॥

कष्टस्थानं, क्ली, (कष्टं कष्टकरं स्थानम् ।) दुःखजनकस्थानम् । इति हारावली ॥

कस ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सकं-सेट्-ज्वलादिः ।) ज कासः कसः । विपूर्व्वोऽयं प्रफुल्लीभावे । तथा च ।

"प्रफुल्लोत्फुल्लसंफुल्लव्याकोषविकचस्फुटाः ।
फुल्लश्चैते विकसिते" इत्यमरः । २ । ४ । ७-८ ।